International Journal of Sanskrit Research 2023; 9(5): 144-146

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2023; 9(5): 144-146
© 2023 IJSR
www.anantaajournal.com
Received: 08-07-2023
Accepted: 15-08-2023

**डॉ. चुक्का प्रवीण**
रीडर् संस्कृतविभागः, आन्ध्रा महिला कलाशाला, गर्तपुरी, आन्ध्र प्रदेश, भारतम्

**Corresponding Author:**
**डॉ. चुक्का प्रवीण**
रीडर् संस्कृतविभागः, आन्ध्रा महिला कलाशाला, गर्तपुरी, आन्ध्र प्रदेश, भारतम्

# मन्दस्मितरामायणकाव्य परिचयः

**डॉ. चुक्का प्रवीण**

सारांश
श्रीमद्राम कथा अनेकैः महाकविभिः काव्यरूपेण निबद्धा। किन्तु श्रीरामुखस्थित मन्दस्मितस्मरणपूर्वकं रामकथावर्णनं श्रीनिधिस्वामिना मन्दस्मितरामायणमिति नाम्ना त्रिशताधिकैरेव श्लोकैः काव्यरूपेण कृतम्। इदं च रामायणं इतर रामायणेभ्यः नूतने पथि रचितमिति तदधिकृत्य निबन्धा समर्प्यते। धीरः रामः दुःखे सुखे च मन्दस्मितं न परित्यक्तवान् इति सर्वेषु श्लोकेषु निबद्धम्।

कूटशब्दः कठिनपदानां व्युत्पत्तिः, विशोषांशाः

प्रस्तावना

**स्पन्दः** ..... कविः काण्डनामानि स्पन्द नामकेन निबद्धवान्। ईषदेव चलनं निश्चलत्वतुल्यं यत्र भवति स स्पन्दः। रामः सुखेदुःखे च ईषदेव चलनं दर्शितवान् इति स्पन्दः शब्दप्रयोगः सार्थः। स्पदि किञ्चित् चलने इति धातोः रूपम्।

**पुटपाकः** ..... गोमय श्लोकैः कल्पिते अग्नौ पाकः। यथा मन्दं दहति अधिकोष्णवान् तथा इति पुटपाक शब्दस्यार्थः।

**रङ्गी** .... रङ्गः श्रीरङ्गक्षेत्रम्। तदस्यास्ति रङ्गी श्रीरङ्गनाथः।

**साहाय्यम्** ....सहायानां समूहः भावो वा।

श्रीमद्रामकथा अस्मिन्नेव मन्वन्तरे चतुर्विंशे त्रेतायुगे आसीदिति हरिवंशपुराणे स्पष्टमुक्तम्।

**चतुर्विंशे युगेचापि त्रेतायां रघुनन्दनः।**
**राज्ञो दशरथस्याभूत पुत्रो पद्मायतेक्षणः॥** 1

रामावतारे काले एव श्रीमद्रामायणरचनमप्यभूत्।

**वेदवेद्ये परे पुंसि जाते दशरथात्मजे।**
**वेदः प्राचेतसादासीत् साक्षाद्रामायणात्मना॥** 2

तदारभ्य भासकालिदासादि महाकवयः रामकथाश्रितानि बहूनि काव्य नाटकानि रचितवन्तः । रामादन्यः सर्वगुणसम्पन्नः नायकः कोऽपि कविभिः न दृष्टः । अतः कवयः स्वकाव्यरिक्तं सार्थकीकर्तुं अद्य अवधि श्रीमद्रामायणकाव्यानि रचयिता । तदुक्तं महाकाविना मुरारिणा....

**यदिक्षुण्णं पूर्वैरिति जहति रामस्य चरितम्**
**गुणैरेतादृिः जगति पुनरन्यो जयति कः ।**
**तमात्मनं तत्तु गुणरगिमगम्भीरमधुर -- स्फुरत्वाग्ब्रह्मणः कथमुपकरिष्यन्ति कवयः ।।** 3

एवं सहस्राधिकेषु रामायणकाव्येषु रचितेष्वपि एकैकशः काव्यस्य प्रशस्तिः पृथग्भूतैव । अद्यतनकाले आसुकविसार्वभौमः भारतराष्ट्रपति सम्मानितः श्रीनिधिस्वामीति प्रसिद्धः "श्रीनिधिरामायणम्" इति नाम्ना त्रिशताधिक श्लोकैः रामकथात्मकं काव्यं रचितवान् । तश्च रामायणकाव्यं "मन्दस्मितरामायणम्" इति नाम्ना कविना स्वयं व्यवहृतम् ।

एतश्च महाकाव्यम् अद्यावधि न प्रकाशितम् । किन्तु तत् कृत्वेण ऐ.ए. एस् पदभूषितेन पितुः सर्वाणि काव्यानि सम्पादितानि । श्रीनिधि ग्रन्थमाला इति नाम्ना तानि सर्वाणि काव्यानि एकगुच्छरूपेण राष्ट्रीय संस्कृतविद्यापीठेन प्रकाशितानि । आचार्य हरेकृष्ण शतपथी काव्यजातस्थास्य सम्पादकः वर्तते । श्रीनिधिस्वामिकविना पञ्चषिष्ठ (65) काव्यानि रचितानि । कवेः जीवितविशेषाः सर्वे तस्य पुत्रेणेव स्वयं प्रबद्धाः काव्यादौ प्रकाशिताश्च । एषः कविः सप्तमवर्षवयस्कः अपि विद्यापीठेन प्रचालितः ।

**आसुकविस्वामीत्येव पण्डितमण्डले परिसूच्यमानाः**

श्रीमदाशुकविसार्वभौमबिरुदपरिभूषणभूताः भारतराष्ट्रपति संमानिता अस्मात्तातपादास्तथाऽस्मदाचा- र्यपादाः श्रीनिधिस्वामीति प्रसिद्धा बात्स्यश्रीनिवासराघवाचार्याः प्रमादी (च) इति नामभाजि संवत्वरे वृश्चिकमासि कृत्तिकानक्षत्रे पाश्चात्यानां रीत्या 11-12-1913 इति वर्तनीये शुभदिने कृतावतारा इति तेषां शतमानमहोत्सवस्तद्रीत्या 11-12-2013 तमे सुदिने भविष्यन्नस्ति ।

**श्रीनिधिस्वामीति अस्य लेखिनीनाम उभयवेदान्त विल्लूर**

श्रीनिवासराघवाचार्यस्वामी इति तत्पुत्रेण उदाहृतम् । अस्य जीवनकालः 1913 -- 2001 । यथा श्रीमद्रामायणे बालकाण्डादि विभागः कथा विभागाय परिकल्पितः तथैव अत्र स्पन्दः इति नाम्ना विभागो दृश्यते । श्रीमद्रामायण कथया साकं रामायणमहाकाव्य कथा कल्पनानि इतरकविकाव्येभ्यः अपि कविना गृहीतानि यथा --अहल्यायाः शिलात्वं कालिदासात् गृहीतम् । जाम्बवता सुग्रीवस्य साचिव्यं मुरारेः अनर्घराघवनाटकात् गृहीतम् । एवमेव रावणेन शिवधनुषः आरोपणाय कृतप्रयत्नोऽपि काव्यान्तरेभ्यः गृहीतः ।

**श्रीरामः** स्मितपूर्वभाषीति भक्तेषु प्रसिद्धः वर्तते । न कदाचित् विषादः रामस्य मुखे अन्यैः दृष्टः । दुर्भरा व्याथामपि सः पुटपाकः अग्नेः उष्णत्वमिति बहिः न प्रकाशयति । तदुक्तं भवभूतिना.....

**आनिर्भिन्नो गभीरत्वात् अन्तर्गूढं घनव्यधः ।**
**पुटपाकः प्रतीकाशः रामस्य करुणो रसः ।।**

रामस्य स्मितपूर्वं भाषित्वं उत्तमं लक्षणं स्वीकृत्य कविः रामभावसूचिकं मन्दस्मितं सर्वेषु सन्दर्भेषु तुल्यरूपं वर्णयन् काव्यमिदं रचितवान् । श्रीमद्रामायणे अदृष्टान् कथा विशेषान् काव्यान्तरात् गृहीत्वा काव्यं निर्मितवान् । रामजन्मनः आरभ्यैव कथा वर्णिता कदाचित् पात्रद्वयस्य सम्भाषण रूपेणैव कथाचलनं नाटकेष्विव संभाषणात्मकं अत्रकाव्ये विशेषतया दृश्यते । वडुवूरू इति क्षेत्रे स्थितः श्रीकृष्णावतारः श्रीमन्नारायणः कवेः अभीष्टं दैवम् । अतः तमेव वडुवूरु क्षेत्रे विराजमानं दैवं संबोधयन् अपि कथांशः वक्ति । तमिलदेशे वासी अयं कविः तद्देशे अभिमानं दर्शयन् श्रीरङ्गस्य प्रसादेन दशरथः श्रीरामपुत्रं प्राप्तवानिति वर्णितवान् ।

**दत्त किं मम रङ्गिणा करुणया सत्यं सुतस्तत्समः**
**किं वाऽथ स्वयमेव येन सुषमा कुचन्मुखे तावते ।**
**नेत्रं कोमलपद्मपत्रविपुलं वत्से ति मातुर्गिरा**
**यन्मन्दस्मितमास्यभूषममभूत् तत्तोऽद्य विद्योतते ।।**

रामायणकथानुसरणं सर्वैरपि ज्ञायते इति येच कथाविशेषाः काव्यन्तरेभ्यः गृहीताः । ब्राह्मणा नारायणस्य संभाषणारूपेण वर्णितः विचित्रः कथाभागः मुरारेः अनर्घराघवात् गृहीतः ।

सुग्रीव एव रामसहायको भविष्यतीति श्रीमद्रामायणे यद्वर्णितं तदत्र परिवृत्तम् । सुग्रीवस्य मुख्यसचिवः जाम्बवान् अरण्यकाण्डे रामसुग्रीवयोः सख्यं सम्पादयितुं सर्वं कार्यं निरूढवान् इति कथा मुरारिणा कल्पिता । काव्येऽस्मिन् बालस्पन्दे ब्रह्मा भूमौ अवतरन्त नारायणमेव वदति भूलोके त्वत्सहायकः जाम्बवान् मया पुरा सृष्टः । ततो नारायणः मयि ते स्नेहः उत्तमः इति वदति । काव्येऽत्र एवं विधाः चमत्काराः बहवो दृश्यन्ते ।

**साहाय्यं तव संविधातुमवनौ सृष्टो मया जाम्बवान्**
**स्नेहस्ते परमः पितामहा मयि त्वं मत्पिता किन्विदम् ।**
**किन्नाजो मम हे । पितामह इह श्रीमत्रिति व्याहतौ**
**धातुस्ते च यदाऽऽस मन्दहसितं तत्तेऽद्य् वियोतते ।।**

तन्मूलभूतं मुरारेः वर्णनं यथा ........

**श्रुणु वत्से । कार्यज्ञासि अस्ति वनौकसां मन्त्री जाम्बवान् । स मतङ्गाश्रमं वास्तव्यामुपसृत्य श्रमणां नामसिद्धिशबरींर्भ्यर्पितवान् ।**
**यथास्य वालिनो द्वौराज्येन क्षीणालुब्धापचित्ताः प्रकृतयः किष्किन्धायां कुमार सुग्रीव मभिप्रेक्ष्ण्यमाणाः सामवादिकं रामभद्रमपेक्षन्ते ।।**

अपि च धनुर्भङ्गकाले सीतारामयोः प्रागेव अन्योन्य दर्शनं रामं सुकुमारदेहं दृष्ट्वा “ वृधा इयं वीर्यशुल्काकृता “ इति सीतामुद्दिश्य जनकादीनां व्यधाऽपि भवभूति कृतात् महावीरचरित नाटकाच् अनुकृता ।

**सौन्दर्यस्य विभूषणं विजयते सोऽयं कुमारो नवः**
**सीता चेयममुष्य भूषणतया स्थातुन्तरामर्हति ।**
**मध्ये कामठपृष्ठतोऽपि कठिनं शैवं धनुर्वर्तते**
**भाग्याढ्या मिथिला नु न ति जनतालापान्नु मन्दस्सितम् ।।**

महावीर चरिते तद्वर्णनं यथा ----

**रामाय पुण्यमहसे सदृशाय सीता दत्तैव दाशरथिचन्द्रमासेऽभविष्यत् ।**
**आरोपणेन प्रणमप्रतिकार्यमार्य स्त्रैयम्बकास्यधनुषो यदि ना करिष्यत् ।।**

शैवधनुषः कमग्रपृष्ठ कठोरत्व साम्यं हनुमन्नाटकात् गृहीतम् । एवमिदं मन्दस्मितरामायणकाव्यं प्रमाणेन लघीयः अपि काव्यगुणैः गुरुतरं रामभक्तिप्रणीकं च वर्तते इति निश्चिप्रचम् ।

**उपयुक्तग्रन्थसूची**

1. हरिवंशः -- हरिवंशपर्वः , अ -- श्लो –
2. श्रीमद्रामायणम् -- वाल्मीकिः , बालकाण्डः , पारायणविधिः ,
3. अनर्घराघवम् - मुरारिः, अ -- श्लो –
4. उत्तररामचरितम् -- भवभूतिः , प्रथमाङ्कः
5. श्रीनिधिगद्यमाला -- श्रीनिधिस्वामिः , षष्ठसरः , महाकाव्यानि - पृ . श्लो –
6. श्रीनिधिगद्यमाला-- श्रीनिधिस्वामिः, षष्ठसरः, महाकाव्यानि , श्लो -- पृ –
7. अनर्घराघवम् -- मुरारिः, अ -- 4 , श्लो –
8. श्रीनिधिगद्यमाला-- श्रीनिधिस्वामिः , षष्ठसरः –महाकाव्यानि , पृ –
9. हनुमन्नाटकम् -- हनुमान, अं -- , श्लो --